योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०२५

पञ्चविंशः सर्गः २५

श्रीवसिष्ठ उवाच ।

संवेदनं भावनं च वासना कलनेति च ।

अनर्थायेह शब्दार्थे विगतार्थो विजृम्भते ।। १

वेदनं भावनं विद्धि सर्वदोषसमाश्रयम् ।

तस्मिन्नेवापदः सन्ति लता मधुरसे यथा ।। २

संसारमार्गे गहने वासनावेशवाहिनः ।

उपयाति विचित्रौघैर्वृत्तवृत्तान्तसंततिः ।। ३

विवेकिनो वासनया सह संसारसंभ्रमः ।

क्षीयते माधवस्यान्ते शनैरिव धरारसः ।। ४

अस्याः संसारसल्लक्या वासनोत्सेधकारिणी ।

कदल्या वनजालिन्या रसलेखेव माधवी ।। ५

संसारान्ध्यतयोदेति वासनात्मा रसश्चितौ ।

यथा वनतया तस्थौ मधुमासरसः क्षितौ ।। ६

चिन्मात्रादमलाच्छून्यादृते किंचिन्न विद्यते ।

नान्यत्किंचिदपर्यन्ते खे शून्यत्वेतरद्यथा ।। ७

वेदनात्मा न सोऽस्त्यन्य इति या प्रतिभा स्थिरा ।

एषाऽविद्या भ्रमस्त्वेष स च संसार आततः ।। ८

अनालोकनसंसिद्ध आलोकेनैव नश्यति ।

असदात्मा सदाभासो बालवेतालवत्क्षणात् ।। ९

सर्वदृश्यदृशो बाधे बोधसारतयैकताम् ।

यान्त्यशेषमहीपीठसरित्पूरा इवार्णवे ।। १०

मृन्मयं तु यथा भाण्डं मृच्छून्यं नोपलभ्यते ।

चिन्मयादितया चेत्यं चिच्छून्यं नोपलभ्यते ।। ११

बोधावबुद्धं यद्वस्तु बोद्ध्यकर्केतेयते ।

नाबोधं बुध्यते बोधो वैरूप्यादिनान्यता ।। १२

द्रष्टृदर्शनदृश्येषु प्रत्येकं बोधमात्रता ।

सारस्तेन तदन्यत्वं नास्ति किंचित्खपुष्पवत् ।। १३

सजातीयः सजातीयेनैकतामनुगच्छति ।

अन्योन्यानुभवस्तेन भवत्वेकत्वनिश्चयः ।। १४

यदि काष्ठोपलादीनां न भवेद्बोधरूपता ।

तत्सदानुपलम्भः स्यादेतेषामसतामिव ।। १५

यदा त्वेषा नु दृश्यश्रीर्बोधमात्रैकरूपिणी ।

तदान्येवाप्यनन्यैव सती बोधेन बोध्यते ।। १६

सर्वं जगद्गतं दृश्यं बोधमात्रमिदं ततम् ।

स्पन्दमात्रं यथा वायुर्जलमात्रं यथार्णवः ।। १७

मिश्रीभूता अपि ह्येते जतुकाष्ठादयो यथा ।

मिथोऽननुभवे मिश्रा ऐक्यं ह्यनुभवे मिथः ।। १८

अन्योन्यानुभवो ह्यैक्यमैक्यं त्वन्योन्यवेदनम् ।

यथाम्भसोः क्षीरयोर्वा न काष्ठजतुनोरिव ।। १९

अहमित्येव बन्धाय नाहमित्येव मुक्तये ।

एतावन्मात्रके बन्धे स्वायत्ते किमशक्तता ।। २०

चन्द्रद्वयप्रत्ययवन्मृगतृष्णाम्बुबुद्धिवत् ।

किमनुत्थित एवायमसदेवाहमुत्थितः ।। २१

ममेदमिति बन्धाय नाहमित्येव मुक्तये ।

एतावन्मात्रके वस्तुन्यात्मायत्ते किमज्ञता ।। २२

यः कुण्डबदरन्यायो या घटाकाशयोः स्थितिः ।

स संबन्धोऽपि नैवान्यमैक्यं ह्यन्योन्यवेदनम् ।। २३

अन्योन्यावेदनं त्वैक्यं भागशो गतमप्यलम् ।

अजडं वा जडं वापि नैकं रूपं विमुञ्चति। ।। २४

नाजडं जडतामेति स्वभावा ह्यनपायिनः ।

यच्चाजडं जडं दृष्टं द्वैति तत्रास्ति नैकता ।। २५

वासनावेशवलिताः कुविकारशतात्मभिः ।

व्रजन्त्यधोधो धावन्तं शिलाः शैलच्युता इव ।। २६

व्यूढानां वासनावातैर्नृतृणानामितस्ततः ।

तान्यापतन्ति दुःखानि तत्र वक्तुं न पार्यते ।। २७

भ्रान्त्वा भृशं करतलाहतकन्दुकाभं

लोकाः पतन्ति निरयेषु रसेन रक्ताः ।

क्लेशेन तत्र परिजर्जरतां प्रयाताः

कालान्तरेण पुनरन्यनिभा भवन्ति ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मोक्षो० निर्वाणप्रकरणे उ० म० मङ्किबोधनं नाम पञ्चविंशः सर्गः ।। २५ ।।